
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.26 - ષષ્ઠ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**

**દેવીં(મ્) સરસ્વતીં(વ્ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**

**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**.. અથષડ્વિંશોડધ્યાયઃ ..**

**શ્રીભગવાનુવાચ**

**મલ્લક્ષણમિમં(ઙ્) કાયં(લ્ઁ) લબ્ધ્વા મદ્ધર્મ આસ્થિતઃ .**

**આનન્દં(મ્) પરમાત્માન - માત્મસ્થં(મ્) સમુપૈતિ મામ્ .. ૧..**

**ગુણમય્યા જીવયોન્યા, વિમુક્તો જ્ઞાનનિષ્ઠયા .**

**ગુણેષુ માયામાત્રેષુ, દૃશ્યમાનેષ્વવસ્તુતઃ .**

**વર્તમાનોડપિ ન પુમાન્, યુજ્યતેડવસ્તુભિર્ગુણૈઃ .. ૨..**

**સં(ઙ્)ગં(ન્) ન કુર્યાદસતાં(મ્), શિશ્નોદરતૃપાં(ઙ્) ક્વચિત્ .**

**તસ્યાનુગસ્તમસ્યન્ધે, પતત્યન્ધાનુગાન્ધવત્ .. ૩..**

ઐલઃ(સ્) સમ્રાડિમાં(ઙ્) ગાથા- મગાયત બૃહચ્છ્રવાઃ .
ઉર્વશીવિરહાન્ મુહ્યન્, નિર્વિણ્ણઃ(શ્) શોકસં(યઁ)યમે .. ૪..

ત્યક્ત્વાઽઽત્માનં(વઁ) વ્રજન્તીં(ન્) તાં(ન્), નગ્ન ઉન્મત્તવન્નૃપઃ .
વિલપન્નન્વગાજ્જાયે, ઘોરે તિષ્ઠેતિ વિક્લવઃ .. ૫..

કામાનતૃપ્તોઽનુજુષન્, ક્ષુલ્લકાન્ વર્ષયામિનીઃ .
ન વેદ યાન્તીર્નાયાન્તી- રુર્વશ્યાકૃષ્ટચેતનઃ .. ૬..

ઐલ ઉવાચ

અહો મે મોહવિસ્તારઃ(ખ્), કામકશ્મલચેતસઃ .
દેવ્યા ગૃહીતકણ્ઠસ્ય, નાયુઃ(ખ્) ખણ્ડા ઇમે સ્મૃતાઃ .. ૭..

નાહં(વઁ) વેદાભિનિર્મુક્તઃ(સ્), સૂર્યો વાભ્યુદિતોઽમુયા .
મુષિતો વર્ષપૂગાનાં(મ્), બતાહાનિ ગતાન્યુત .. ૮..

અહો મે આત્મસમ્મોહો, યેનાત્મા યોષિતાં(ઙ્) કૃતઃ .
ક્રીડામૃગશ્ચક્રવર્તી, નરદેવશિખામણિઃ .. ૯..

સપરિચ્છદમાત્માનં(મ્), હિત્વા તૃણમિવેશ્વરમ્ .
યાન્તીં(મ્) સ્ત્રિયં(ઞ્) ચાન્વગમં(ન્), નગ્ન ઉન્મત્તવદ્ રુદન્ .. ૧૦..

કુતસ્તસ્યાનુભાવઃ(સ્) સ્યાત્, તેજ ઈશત્વમેવ વા .
યોઽન્વગચ્છં(મ્) સ્ત્રિયં(યઁ) યાન્તીં(ઙ્), ખરવત્ પાદતાડિતઃ .. ૧૧..

કિં(વઁ) વિદ્યયા કિં(ન્) તપસા, કિં(ન્) ત્યાગેન શ્રુતેન વા .
કિં(વઁ) વિવિક્તેન મૌનેન, સ્ત્રીભિર્યસ્ય મનો હૃતમ્ .. ૧૨..

સ્વાર્થસ્યાકોવિદં(ન્) ધિઙ્ માં(મ્), મૂર્ખં(મ્) પણ્ડિતમાનિનમ્ .
યોઽહમીશ્વરતાં(મ્) પ્રાપ્ય, સ્ત્રીભિર્ગોખરવજ્જિતઃ .. ૧૩..

સેવતો વર્ષપૂગાન્ મે, ઉર્વશ્યા અધરાસવમ્ .
ન તૃપ્યત્યાત્મભૂઃ(ખ્) કામો, વહ્નિરાહુતિભિર્યથા .. ૧૪..

પું(મ્)શ્ચલ્યાપહૃતં(ઞ્) ચિત્તં(ઙ્), કો ન્વન્યો મોચિતું(મ્) પ્રભુઃ .
આત્મારામેશ્વરમૃતે, ભગવન્તમધોક્ષજમ્ .. ૧૫..

બોધિતસ્યાપિ દેવ્યા મે, સૂક્તવાક્યેન દુર્મતેઃ .
મનોગતો મહામોહો, નાપયાત્યજિતાત્મનઃ .. ૧૬..

કિમેતયા નોઽપકૃતં(મ્), રજ્જ્વા વા સર્પચેતસઃ .
રજ્જુસ્વરૂપાવિદુષો, યોઽહં(યઁ) યદજિતેન્દ્રિયઃ .. ૧૭..

ક્વાયં(મ્) મલીમસઃ(ખ્) કાયો, દૌર્ગન્ધ્યાદ્યાત્મકોઽશુચિઃ .
ક્વ ગુણાઃ(સ્) સૌમનસ્યાદ્યા, હ્યધ્યાસોઽવિદ્યયા કૃતઃ .. ૧૮..

પિત્રોઃ(ખ્) કિં(મ્) સ્વં(ન્) નુ ભાર્યાયાઃ(સ્), સ્વામિનોઽગ્નેઃ(શ્) શ્વગૃધ્રયોઃ .
કિમાત્મનઃ(ખ્) કિં(મ્) સુહૃદા-મિતિ યો નાવસીયતે .. ૧૯..

તસ્મિન્ કલેવરેઽમેધ્યે, તુચ્છનિષ્ઠે વિષજ્જતે .
અહો સુભદ્રં(મ્) સુનસં(મ્), સુસ્મિતં(ઞ્) ચ મુખં(મ્) સ્ત્રિયાઃ .. ૨૦..

ત્વઙ્માં(મ્)સરુધિરસ્નાયુ-મેદોમજ્જાસ્થિસં(મ્)હતૌ .
વિણ્મૂત્રપૂયે રમતાં(ઙ્), કૃમીણાં(ઙ્) કિયદન્તરમ્ .. ૨૧..

અથાપિ નોપસજ્જેત, સ્ત્રીષુ સ્ત્રૈણેષુ ચાર્થવિત્ .

વિષયેન્દ્રિયસં(યઁ્)યોગાન્-મનઃ ક્ષુભ્યતિ નાન્યથા .. ૨૨..

અદૃષ્ટાદશ્રુતાદ્ ભાવાન્ - ન ભાવ ઉપજાયતે .
અસમ્પ્રયું(ગ્)જતઃ(ફ્) પ્રાણાન્, શામ્યતિ સ્તિમિતં(મ્) મનઃ .. ૨૩..

તસ્માત્ સં(ઙ્)ગો ન કર્તવ્યઃ(સ્) સ્ત્રીષુ સ્ત્રૈણેષુ ચેન્દ્રિયૈઃ .
વિદુષાં(ગ્) ચાપ્યવિસ્રબ્ધઃ(ષ્), ષડ્વર્ગઃ(ખ્) કિમુ માદૃશામ્ .. ૨૪..

શ્રીભગવાનુવાચ

એવં(મ્) પ્રગાયન્ નૃપદેવદેવઃ(સ્)
સ ઉર્વશીલોકમથો વિહાય .
આત્માનમાત્મન્યવગમ્ય માં(વઁ્) વૈ,
ઉપારમજ્જ્ઞાનવિધૂતમોહઃ .. ૨૫..

તતો દુઃ(સ્)સં(ઙ્)ગમુત્સૃજ્ય, સત્સુ સજ્જેત બુદ્ધિમાન્ .
સન્ત એતસ્ય છિન્દન્તિ, મનોવ્યાસં(ઙ્)ગમુક્તિભિઃ .. ૨૬..

સન્તોઽનપેક્ષા મચ્ચિત્તાઃ(ફ્), પ્રશાન્તાઃ(સ્) સમદર્શિનઃ .
નિર્મમા નિરહં(ઙ્)કારા, નિર્દ્વન્દ્વા નિષ્પરિગ્રહાઃ .. ૨૭..

તેષુ નિત્યં(મ્) મહાભાગ, મહાભાગેષુ મત્કથાઃ .
સમ્ભવન્તિ હિતા નૃણાં(ગ્) જુષતાં(મ્) પ્રપુનન્ત્યઘમ્ .. ૨૮..

તા યે શૃણ્વન્તિ ગાયન્તિ, હ્યનુમોદન્તિ ચાદૃતાઃ .
મત્પરાઃ(શ્) શ્રદ્દધાનાશ્ચ, ભક્તિં(વઁ્) વિન્દન્તિ તે મયિ .. ૨૯..

ભક્તિં(લઁ્) લબ્ધવતઃ(સ્) સાધોઃ(ખ્), કિમન્યદવશિષ્યતે .
મય્યનન્તગુણે બ્રહ્મણ્- યાનન્દાનુભવાત્મનિ .. ૩૦..

યથોપશ્રયમાણસ્ય, ભગવન્તં(વ઼ૅ) વિભાવસુમ્ .
શીતં(મ્) ભયં(ન્) તમોઽપ્યેતિ, સાધૂન્ સં(મ્)સેવતસ્તથા .. ૩૧..

નિમજ્જ્યોન્મજ્જતાં(ઙ્) ઘોરે, ભવાબ્ધૌ પરમાયણમ્ .
સન્તો બ્રહ્મવિદઃ(શ્) શાન્તા, નૌર્દૃઢેવાપ્સુ મજ્જતામ્ .. ૩૨..

અન્નં(મ્) હિ પ્રાણિનાં(મ્) પ્રાણ, આર્તાનાં(મ્) શરણં(ન્) ત્વહમ્ .
ધર્મો વિત્તં(ન્) નૃણાં(મ્) પ્રેત્ય, સન્તોઽર્વાગ્ બિભ્યતોઽરણમ્ .. ૩૩..

સન્તો દિશન્તિ ચક્ષૂં(મ્)ષિ, બહિરર્કઃ(સ્) સમુત્થિતઃ .
દેવતા બાન્ધવાઃ(સ્) સન્તઃ(સ્), સન્ત આત્માહમેવ ચ .. ૩૪..

વૈતસેનસ્તતોઽપ્યેવ- મુર્વશ્યા લોકનિ:(સ્) સ્પૃહઃ .
મુક્તસં(ઙ્)ગો મહીમેતા- માત્મારામશ્ચચાર હ .. ૩૫..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયામેકાદશસ્કન્ધે ષડ્વિં(મ્)શોઽધ્યાયઃ .. ૨૬..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

